लघुपाराशरी

उपशास्त्री



अथ ग्रहसम्बन्धानाह —

निवसेतां व्यत्ययेन तावुभौ धर्मकर्मणोः।
एकत्रान्यतरो वापि वसेच्चेद्योगकारकौ ॥

अन्वयः — तौ उभौ व्यत्ययेन धर्मकर्मणोः निवसेतां । वा एकत्र निवसेतां योगकारकौ भवतः ।

संस्कृत - तावुभाविति नवमदशमाधीशौ व्यत्ययेन निवसेतां नवमेशो दशमे दशमेशश्च नवमे तदैकोयोगः एकत्र निवसेतां यत्र कुत्राप्येकराशौ भवेतां तदा द्वितीयो योगः अन्यतरो वापि व्यत्ययेन वसेच्चेद्दशमेशो नवमे वा नवमेशो दशमे तदा योगकारकौ भवेताम् - परमत्र पूर्वश्लोकोक्तयोगावैलक्षण्यात् पुनरुक्तिदोषात्कैश्चिदेवं व्याख्यते । धर्मशब्देन त्रिकोणं कर्मशब्देन केन्द्रस्थानानि ग्राह्याणि । तेन तावुभौ धर्मकर्मणोः केन्द्रत्रिकोणयोर्नेतारौ स्वामिनौ त्रिकोणकेन्द्रयोर्व्यत्ययेन निवसेतां केन्द्रेशस्त्रिकोणे त्रिकोणेशश्च केन्द्रे तदैको राजयोगः एकत्र व्यत्ययेन वा द्वावपि निवसेतां यथा केन्द्रे वा त्रिकोण एव केन्द्रत्रिकोणाधीशौ निवसेतां तदा द्वितीयोयोगः पूर्वापेक्षया न्यूनो भवेत् । अथवा एक एव तयोर्मध्ये व्यत्ययेन वसेत्तदा तृतीयोयोगः यथा त्रिकोणेशः केन्द्रे वा केन्द्रेशस्त्रिकोणे अथवा चेत् द्वयनेन केन्द्रेशः केन्द्रे त्रिकोणेशस्त्रिकोणे इतियोगव्यत्ययेन निवसेतां तदा योगकारकौ भवेतामिति परमत्रापि प्राचीनमत-विरोधादस्वारस्याच्चायमर्थो न युक्तः । तेनात्रग्रन्थसम्बन्धस्यैव प्राधान्यात्सम्बन्धान्पूर्वयोगसाहचर्येणैव वर्णयति । तावुभौ बलिनौ केन्द्रत्रिकोणनेतारावर्थात् धर्मकर्मणोः स्वामिनौ स्वयंदो-षमुक्तावपि यदा व्यत्ययेन स्वस्थानयोर्वैपरीत्येन निवसेतामिव-नेनस्थानसम्बन्धः उक्तः । एकत्र निवसेतामित्यनेनैकत्र स्थितिसम्बन्धः उक्तः । अन्यतरो वाप्यर्थादेकोऽन्यस्यराशौ स्थितोऽन्यं पश्यति

P.T.O

(10) विस्तीर्णमांसोपचितो नितम्बो गुरुश्च धत्ते रसनाकलापम् ।
नाभिर्गभीरा विपुलाङ्गनानां प्रदक्षिणावर्तगता च शस्ता ॥
कस्यायं श्लोकः ?

उत्तरम् - वराहमिहिरस्य ।

(11) स्थिरा त्रिरेखा सुभगोपपन्ना स्निग्धा सुमांसोपचिता सुवृत्ता ।
न चातिदीर्घा चतुराङ्गुला च ग्रीवा च दीर्घा भवतीह धन्या ॥
कस्याचार्यस्य वचनमिदम् ?

उत्तरम् - गर्गाचार्यस्य ।

(12) जघनं विपुलं यस्या सुस्पर्शं रोमवर्जितम् ।
सुवर्णाभरणैर्युक्ता सा भवेद्राज्यभागिनी ॥
गम्भीरा विपुला नाभी दक्षिणावर्तमाश्रिता ।
शस्ता विपर्यये नेष्टा वामावर्ता विशेषतः ॥
कस्य वचनमिदम् ?

उत्तरम् - समुद्रस्य ।

(13) अधरो बिम्बसदृशो मांसलो स्फुरितस्तथा ।
यस्याः सा राजमहिषी कुमारी नात्र संशयः ॥
कस्येदं कथनम् ?

उत्तरम् - गर्गस्य ।

(14) द्वात्रिंशद्दशना यस्याः सर्वे गोक्षीरपाण्डुराः ।
सर्वे शिखरिणः स्निग्धा राजभार्या च सा भवेत् ॥
वाक्यमिदं कस्य ?

उत्तरम् - समुद्रस्य ।

(15) कति दन्ताः शुभाः भवन्ति कुमारीणाम् ?

उत्तरम् - द्वात्रिंशत् ।

डॉ० सुधीर कुमार
सहा० प्राचार्य (ज्योतिष)
रा० उ० सं० महावि० सुखसेना,
पूर्णियाँ ।

# वस्तुनिष्ठप्रश्नाः

## शास्त्री-I, II

21.08.20
3

(1) विन्ध्याचलं कः शास्ति ?

उत्तरम् - रुचकपुरुषः।

(2) सम्पूर्णाङ्गो वामनो भग्नपृष्ठः किञ्चिच्चोरुर्मध्यकक्ष्यान्तरेषु।
ख्यातो राज्ञां ह्येष भद्रानुजीवी स्फीतो राजा वासुदेवस्य भक्तः॥
इति कस्य लक्षणम् ?

उत्तरम् - सङ्कीर्णपुरुषस्य।

(3) जघन्यपुरुषः कस्य राज्ञः सेवकः ?

उत्तरम् — मालव्यराज्ञः।

(4) कुब्जपुरुषः कीदृशो भवति ?

उत्तरम् - कलाविद्।

(5) मण्डलकः कस्य सेवको भवति ?

उत्तरम् - रुचकराज्ञः।

(6) किं जानाति मण्डलकः ?

उत्तरम् - अभिचारं विजानाति।

(7) कुमार्याः किंवर्णकाः नखा भवेयुः ?

उत्तरम् - ताम्रवर्णकाः।

(8) स्निग्धोन्नताग्रतनुताम्रनखौ कुमार्याः
पादौ समोपचितचारुनिगूढगुल्फौ।
श्लिष्टाङ्गुली कमलकान्तितलौ च यस्या-
स्तामुद्वहेद्यदि भुवोऽधिपतित्वमिच्छेत्॥
कुत इदं पद्यं गृहीतम् ?

उत्तरम् - वाराहीसंहितातः।

(9) स्निग्धौ ताम्रनखौ धन्यौ कूर्मपृष्ठौ सुलोहितौ।
निगूढगुल्फौ सुश्लिष्टौ घनाङ्गुलिसमन्वितौ॥
मत्स्याङ्कुशयवाब्जेषु हलवज्रासिचिह्नितौ।
सुस्पृष्टौ रोमरहितौ कुमार्याश्चरणौ शुभौ॥
कस्येदं पद्यम् ?

उत्तरम् - समुद्रस्य।

P.T.O

21.08.20
2

-धेदित्यनेन साहचर्यं सम्बन्धः उक्तः। अथ वा वसेच्चेदिति-कथनात्तुल्ये परस्परदृष्टि योग्ये स्थाने तौ निवसेतामित्यने-न दृष्टि सम्बन्धो द्योतितः तदा योगस्यावश्यंभावित्वात्तौ योगकारकौ भवेतां योगकारकौ भवेतामिति द्विरुक्तिः। सम्बन्धो ग्रन्थान्तरे —

व्यत्यस्ताश्रयसम्बन्धश्चान्योन्यालोकसम्भवः।
एकस्य राशौ संस्थित्या तदीशालोकनादपि॥
सहवासाच्च सम्बन्धा इत्येते स्युश्चतुर्विधाः।
अत्रापि पूर्वपूर्वाः स्युः सम्बन्धा बलवत्तराः॥

क्षेमङ्करी - केन्द्रेश (दशमेश) त्रिकोण (नवम) में, त्रिकोणेश (नवमेश) केन्द्र (दशम) में हो, तो यह एक योग हुआ। प्रथम से यह कुछ न्यून है। केन्द्रेश व त्रिकोणेश दोनों केन्द्र में हो अथवा त्रिकोण में हो, यह दूसरा योग हुआ, यह पूर्व से न्यून है। केवल केन्द्रेश त्रिकोण में अथवा केवल त्रिकोणेश केन्द्र में हो, यह तीसरा योग है, यह सबसे न्यून योग हुआ।

विमर्श: - श्लोक में उदाहरणस्वरुप दशम व नवम भाव को प्रतीक माना है। अतएव कहा जाता है कि नव-मेश दशम में व दशमेश नवम में हो, दशमेश व नवमेश दोनों दशम या नवम में स्थित हो और दशमेश नवम में हो या नवमेश दशम में हो, तो प्रबल राजयोग कारक होते हैं। और उत्तरोत्तर अल्पबली होते हैं। केन्द्रों में दशम सर्वाधिक बलिष्ठ और त्रिकोणों में नवम सर्वाधिक बली है।

डॉ० सुदिष्ट कुमार
सहा० प्राचार्य (ज्योतिष)
रा० उ० सं० महाविद्यालय
सुखसेना, पूर्णियाँ।